# संस्कृतभाषा इहपरकल्याणसाधिका

**N. R. Bahallika Rao**

Research Scholar, Karnataka Samskruta Vishwavidyalaya, Bangalore, Karnataka.

DOI: https://doi.org/10.5281/zenodo.15796154

## ABSTRACT:

"इह – पर"- इति अस्य जगतः अन्यस्य जगतः विषये ज्ञातुं सुलभतरः उपायः अस्ति ।तदस्माकं पर्यावरणं परितः आदौ कौतूहलेनअवलोकनंकरणीयम् । ततः इदं कः सृष्टवान् कथं सृष्टाः किमर्थं सृष्टाः इति प्रश्नाः मनसि उत्पद्यन्ते । तदेव कौतुकं भारतीयानां जीवनस्य परमलक्ष्यीकृतं तत्वचिन्तनमस्ति । सा चिन्तना एव " ब्रह्म जिज्ञासा" इति कथ्यते । अनया मानवः जिज्ञासया इह – पर विषये अवगन्तुम् आरभेत ।

इदं जगत् – ब्रह्माण्डं समग्रतया विस्मयकारि वर्तते । आदौ भूमिग्रहः यत्र वयं जीवामः तत्र यानिभिन्न - भिन्नानि चराचर वस्तूनि सन्तितेषां स्वरूपाणि प्रत्यक्षतया अनुभवामः । अपि च तत्र अद्यापि अनविष्कृताः अनेके विषयाः वर्तन्ते । अस्माकं पृथिवी अत्यन्तं विशाला अनन्ते अन्तरिक्षे प्लवति । तथैव सूर्यः चन्द्रः अन्ये ग्रहाः असङ्ख्यातनक्षत्राणि तेषां निर्धारितपथे परिभ्रमन्ति ।सर्वेषां सत्तानां एतानि सर्वाणि कार्याणि परस्परम् अनुकूलानि सन्ति ।

जगति जडचेतनौ स्तः । जडाः अस्वतन्त्राः ।किन्तु मनुष्यसहिताः प्राणिनः अन्तः "जीव – आत्म" इति "अदृश्यमानं चालनं स्थायित्वं शक्तियुक्ताः सन् स्वतन्त्रतया यथापेक्षते तथा कार्यं कर्तुं शक्नुवन्ति । ते विशिष्य चिन्तनमन्थन सामर्थ्ययुक्ताः सन्ति ।प्राणिनां शरीराणि जडप्रकृत्या निर्मितम्। तस्मिन् प्रविष्टाः अप्राकृतिकाः जीवाः यथोचितव्यापारं कुर्वन्ति । एषःसन्निवेशः प्राणिनः जन्म इति कथ्यते । किन्तु सर्वं हि आयुः निर्धारितम् । शरीरात् जीवस्य निर्गमनमेव जीवनस्य अन्त्यः ।एवम् आत्मनः स्वरूपं वर्णयति भगवद्गीता ।

न जायते म्रियते वा कदाचिद् नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ (२ – २०)

## KEYWORDS:

आत्मा, परमात्मा, मोक्षः, जीवनम्, ब्रह्मन्, जिज्ञासा.

**इहलोकः**

"इह – पर"- इति अस्य जगतः अन्यस्य जगतः विषये ज्ञातुं सुलभतरः उपायः अस्ति ।तदस्माकं पर्यावरणं परितः आदौ कौतूहलेनअवलोकनंकरणीयम् । ततः इदं कः सृष्टवान् कथं सृष्टाः किमर्थं सृष्टाः इति प्रश्नाः मनसि उत्पद्यन्ते । तदेव कौतुकं भारतीयानां जीवनस्य परमलक्ष्यीकृतं तत्वचिन्तनमस्ति । सा चिन्तना एव " ब्रह्म जिज्ञासा" इति कथ्यते । अनया मानवः जिज्ञासया इह – पर विषये अवगन्तुम् आरभेत ।

इदं जगत् – ब्रह्माण्डं समग्रतया विस्मयकारि वर्तते । आदौ भूमिग्रहः यत्र वयं जीवामः तत्र यानिभिन्न - भिन्नानि चराचर वस्तूनि सन्तितेषां स्वरूपाणि प्रत्यक्षतया अनुभवामः । अपि च तत्र अद्यापि अनविष्कृताः अनेके विषयाः वर्तन्ते । अस्माकं पृथिवी अत्यन्तं विशाला अनन्ते अन्तरिक्षे प्लवति। तथैव सूर्यः चन्द्रः अन्ये ग्रहाः असङ्ख्यातनक्षत्राणि तेषां निर्धारितपथे परिभ्रमन्ति ।सर्वेषां सत्तानां एतानि सर्वाणि कार्याणि परस्परम् अनुकूलानि सन्ति ।

जगति जडचेतनौ स्तः । जडाः अस्वतन्त्राः ।किन्तु मनुष्यसहिताः प्राणिनः अन्तः "जीव – आत्म" इति "अदृश्यमानं चालनं स्थायित्वं शक्तियुक्ताः सन् स्वतन्त्रतया यथापेक्षते तथा कार्यं कर्तुं श्क्नुवन्ति । ते विशिष्य चिन्तनमन्थन सामर्थ्ययुक्ताः सन्ति ।प्राणिनां शरीराणि जडप्रकृत्या निर्मितम्। तस्मिन् प्रविष्टाः अप्राकृतिकाः जीवाः यथोचितव्यापारं कुर्वन्ति । एषःसन्निवेशः प्राणिनः जन्म इति कथ्यते । किन्तु सर्वं हि आयुः निर्धारितम् । शरीरात् जीवस्य निर्गमनमेव जीवनस्य अन्त्यः ।एवम् आत्मनः स्वरूपं वर्णयति भगवद्गीता ।

न जायते म्रियते वा कदाचिद् नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥ (२ – २०)

नैनं छिन्दिन्त शस्त्राणि नैनं दहति पावकः ।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ (२ – २३ )

जीवः केनापि दृष्टः वा ?

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।

आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ (२ – २३ )

तस्मात् मानवः इतः आरभ्य आत्मनः विषये चिन्तनतर्कादिना जिज्ञासुः भवति ।

एभिः वाक्यैः ज्ञायते सः कोऽपि अस्ति यः चेतनाचेतनयुक्तः जगति जडप्रकृत्या सह जीवात्मानमपि एकाकीविश्वस्य सृष्टिस्थितिः तथा आयुराधारित लयस्य कर्ताऽपिभूत्वानियन्त्रयति । तद् ब्रह्म – परमात्मा इति कथ्यते ।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।

प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ (भ गी - ४ – ६)

अतः “जीवात्मा(शरीरस्थः अगोचरः) – जडः – प्रकृतिः - परमात्मा(अगोचरः)” इति चत्वारः मुख्यः तत्वाः सन्ति ।एते तत्वाः इह – पर सुखस्य अन्वेषणाय महत्वपूर्णः कारकाः भवन्ति ।

इहैव भूमौ सत्सु मानवः “सुखमेव मे स्यात् दुःखं मनागपि मा भूत्” इति सुरक्षितजीवनार्थं प्रत्येकं पदं योजनां करोति तत् साधयितुं सततं प्रयतते च ।केवलं चक्षुरिन्द्रियाणि सर्वेषां जीवीनां समानानि परं तर्कानुमानचिन्तनाविशेषशक्तिः मानवे वर्ः संवर्तते । अस्य परिणामेन आहार – निद्रा – सन्तानोत्पत्तिनामकस्वार्थानुगुणान् जायमानः जीवी प्राप्नोति । मनसोदिष्टं प्राप्तुं क्रियमाणः प्रयत्नः एव स्पर्धा । बलिष्ठैः समम् असहायानां सङ्घर्षः जीवितुम् अनिवार्यः । सङ्घर्षस्य समतोलनार्थं न्यायसम्मतया परिज्ञानावलम्बनमेव( परिस्यात् सर्वतो भावे व्याप्तौ) वरम् । वेदाः ज्ञानस्य स्रोतः । ते अपौरुषेयाः सर्वहिताय च कर्तव्याकर्तव्यं बोधयति । नियामातिक्रमे दुःखं हिंसा च धर्मपालने सुखं शान्तिश्च ।याकापि अस्माकम् इच्छा भवतु तां साधयितुं यत्र वयं निवसेम तस्मिन्नेव पृथिवीपरिसरे एव एकमात्रम् उपकरणमस्ति । तस्माद् इतः एव मानवस्य परिश्रमः अस्यां दिशि वर्तितव्यः ।

इह इत्युक्ते लौकिकजीवनं विषयवस्तूनां निरिक्षा । विषयवस्तुभिः प्राप्तसुखदुःखानुभवे भवति एका सीमा । अतिसुखंवातिदुःखं अन्ते वैराग्यमेवापेक्षते । एतदेव वैराग्यं लौकिकान्मुक्तिं परमशान्तिमिच्छति । सः शान्तिमार्गः आत्मविमर्शातः अगोचरतत्वपर्यन्तं निरन्तरं प्रवर्तते ।

तच्चिन्तने जीव – ब्रह्म – कर्मसिद्धान्त – पुनर्जन्मादिविचाराः भारतीयजीवनतत्वदर्शिभिः दार्शनिकैः वेद – पुराण – शास्त्र – दर्शन – काव्यसाहित्यात्मकसंस्कृतभाषायां प्रदर्शिताः कल्याणसाधिकाः वर्तन्ते ।

इहसंसारे कथं वर्तितव्यमिति कानिचित् सन्मार्गाणि सूचिता्नि वाक्यानि दर्शितानि सन्ति । प्रथमं एतत् ईशावास्योपनिषद् वाक्यस्यार्थं जानीमः ॥

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ॥ (ईशा – १ )

एतानि नीतिवाक्यानि जीवनं सुरक्षिततया चालयितुं मार्गदर्शकानि भवन्ति ।

१. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् । मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

२. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः। विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥

३. अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् । सदालोकहिते युक्ता रत्नदीपा इव ॥

४. व्रते विवादं विमतिं विवेके सत्येऽतिशङ्कां विनये विकारम् । गुणोऽवमानं कुशले निषेधं धर्मे विरोधं न करोति साधुः ॥

५. पाषाणो भिद्यते टङ्कैर्वज्रं वज्रेण भिद्यते । सर्पोऽपि भिद्यते मन्त्रैर्दुष्टात्मा नैव भिद्यते ॥

६. माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते भृत्यः कुप्यति नानुगच्छति सुतः कान्ता च नालिङ्गते । अर्थप्रार्थनशङ्कया न कुरुते सम्भाषणं वै सुहृत्तस्माद्द्रव्यमुपार्जयस्व सुमते द्रव्येण सर्वे यशाः ॥

७. दानेन भूतानि वशीभवन्ति दानेन वैराण्यपि यान्ति नाशम् । परोऽपि बन्धुत्वमुपैति दानैर्दानं हि सर्वव्यसनानि हन्ति ॥

८. अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः । सदा सन्तुष्टमनसः सर्वाः सुखमया दिशा॥

९. गुणवन्तः क्लिष्यन्ते प्रायेण भवन्ति निर्गुणाः सुखिनः । बन्धनमायान्ति शुका यथेष्टसञ्चारिणः काकाः ॥

१०. क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति । अतृणे पतितं वह्निः स्वयमेवोपशाम्यति ॥

११. सानन्दं सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी सन्मित्रं सुधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः । आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥

१२. निकटस्थं दहत्यग्निर्न तु दूरापसर्पितम् । कुलं दहति राजाग्निः सपशुद्रव्यबान्धवम् ॥

१३. को देशः कानि मित्राणि कः कालः कौ व्ययागमौ । कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥

१४. पुत्रमित्रकलत्रेषु सक्ताः सीदन्ति जन्तवः । सरःपङ्कार्णवे मग्ना जीर्णा वनगजा इव ॥

१५. कार्याकार्ये किमपि सततं नैव कर्तृत्वमस्ति जीवन्मुक्तस्थितिरवगतो दग्धवस्त्रावभासः । एवं देहे प्रविलयगते तिष्ठमानो विमुक्तो निस्त्रैगुण्ये पथि विचरतः को विधिः को निषेधः ॥

१६. आदरेण यथा स्तौति धनवन्तं धनेच्छया । तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥

१७. अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥(म उप – ६ )

जन्मतः मनुष्यः कर्मसमूहेन सह बध्नाति । कर्म कृत्वा तस्य कर्मस्य परिणामः स्वयमेव अनुभवितव्यः भविष्यति । कर्म त्रिविधम् – सात्विकः – राजसः – तामसः इति । तत्प्रकारः अनन्तकर्मणाम् फलानाम् अनुभवाय पुनर्जन्मसुविधा प्रदत्ता अस्ति । सः प्रत्येकं जीवने पुनरावर्तनीयानि कर्माणि कुर्वन् भवति । एतत् अपरिहार्यचक्रम् अस्ति ।

इदं श्रीश्रीशङ्कराचार्यः एवं विषदी करोति ।

पुनरपि जननं पुनरपि मरणं पुनरपि जननी जठरे शयनम् ।

इह संसारे बहु दुस्तारे कृपयाऽपारे पाहि मुरारे ॥(भ गो – २२)

अतः अस्मात् संसारचक्रात् मुक्तिं प्राप्तुं जीवने विहित कर्मानुष्ठानमेव करणीयम् अविहित कर्म न आचरणीयः । वेद्विहितकर्माणि यथा -

“यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषीणाम् ॥“ ( भ गी – १८ – ५ ) आचरणीयम् । तेन सह श्रुतिस्मृतिपुराणोक्त धर्मानुष्ठानं कर्तव्यम् । अपि च “यम-नियमादि....” योगशास्त्रबलेन दैहिक-मानसिक-आत्मनः त्रिविध-सिद्धयः प्राप्यन्ते । एवं ऐहिक विषये जितेन्द्रियत्वं पालयन् मुमुक्षुः मानवः “पर” चिन्तनार्थम् अर्हो भवति।

**परलोकः**

परः इत्युक्ते “समस्तलोकस्य” सृष्टिकर्ता । प्राकृतिक चक्षुषा अगोचरः । स्वभावतः अप्राकृतिकः अव्यक्तः । परन्तु सर्वव्यापी । जगतः नियतिप्रदाता सर्वथा भिन्नः ।स एव वेदविषयः ।

सः कथं संसारे प्रवर्तते? भगवद्गीता वाक्यानि पश्यामः । गामाविष्य च भूतानि धारयाम्यहमोजसा । पुष्णामि औषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥(भ गी – १५ -१३)

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥(भ गी – १५ – १५ )

किन्तु मुमुक्षवः एवं मां प्रार्थयन्ते ।

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितः नाभिजानाति मामेभ्यः परमव्ययम् ॥ ( भ गी – ७ -१३)

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ ( भ गी – ७ – १६ )

तेषां ज्ञानी नित्ययुक्तः एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ (भ गी – ७ -१७ )

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते । वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥( भ गी – ७ – १९ )

पुनश्च

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यम् आत्मनिवेदनम् ॥ ( भाग – ७ – ५ – २३ )

{ वासुदेवः – वस आच्छादने इदं जगत् आच्छाद्य दीव्यति इति}

{विष्णुः – सर्वचेष्टयितृत्वाच्च विशिष्टबलस्तथा ।...}

एवं विहितकर्माणि अनुसरन् मुमुक्षुः परं धामं प्राप्तुं शक्नोति ।

भारतीय दार्शनिकाः “जीवात्मा-परमात्मा समानम् इति – जडप्रकृतिरपि परमात्मा एव इति – जिवात्मा – जडप्रकृतिः – परमात्मा भिन्न भिन्नः” इत्यपि निरूपयन्ति । एते वेदम् अनुसरन्ति । अन्याः केचन दार्शनिकाः वेदान् न आश्रयन्ति ।

एतेषां दर्शनानां अनुसरन्तः जनाः तेषां दर्शनानां सिद्धान्तानुसारं निष्कर्षितं स्वसुखं प्राप्नुवन्ति ।

ते मोक्षाः समानाः वा न वा ? केवलं विमुक्तः विमोचकः एव जानीतः । परन्तु तत् इहलोके वयं कथं जानीमः? तदर्थं मुमुक्षवः पुनःपुनः क्रमाधारिता जिज्ञासा करणीयाः ।

“सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत् ॥

॥ ओम् शान्तिः शान्तिः शान्तिः ॥

**Funding:**

This study was not funded by any grant.

**Conflict of interest:**

The Authors have no conflict of interest to declare that they are relevant to the content of this article.

**About the License:**

© The Authors 2024. The text of this article is open access and licensed under a Creative Commons Attribution 4.0 International License.